दुर्गा सप्तशती — अध्याय 4

Durga Saptashati — Chapter 4

Source: Selected 1894 ancient core — chapter 4. Also compared: Opening speaker — physical scan 133; Ending and colophon — physical scan 151; Verified 1894 imprint — physical scan 7; Ancient Sanskrit comparison only — independently inspected recitation edition.

प्रारम्भ — वक्ता

SPEAKER

ऋषिरुवाच।

ṛṣiruvāca|

अध्याय 4 — शक्रादि स्तुति

TEXT POSITION 1

शक्रादयः सुरगणा निहतेऽतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः॥

śakrādayaḥ suragaṇā nihate'tivīrye tasmindurātmani surāribale ca devyā|
tāṃ tuṣṭuvuḥ praṇatinamraśirodharāṃsā vāgbhiḥ praharṣapulakodgamacārudehāḥ||

Note: The smaller alternative opening inside commentary is not large main शक्रादयः; excluded. Main follows the longer four-pada stuti form.

TEXT POSITION 2

देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या।
तामम्बिकामखिलदेवमहर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि सा नः॥

devyā yayā tatamidaṃ jagadātmaśaktyā niḥśeṣadevagaṇaśaktisamūhamūrtyā|
tāmambikāmakhiladevamaharṣipūjyāṃ bhaktyā natāḥ sma vidadhātu śubhāni sā naḥ||

Note: Enlarged image confirms समूहमूर्त्या, matching comparison position 3. Correct first-pass समूहसूर्त्या as a transcription error, not a source variant.

TEXT POSITION 3

यस्याः प्रभावमतुलं भगवाननन्तो ब्रह्मा हरश्च नहि वक्तुमलं बलं च।
सा चण्डिकाखिलजगत्परिपालनाय नाशाय चाशुभभयस्य मतिं करोतु॥

yasyāḥ prabhāvamatulaṃ bhagavānananto brahmā haraśca nahi vaktumalaṃ balaṃ ca|
sā caṇḍikākhilajagatparipālanāya nāśāya cāśubhabhayasya matiṃ karotu||

TEXT POSITION 4

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम्॥

yā śrīḥ svayaṃ sukṛtināṃ bhavaneṣvalakṣmīḥ pāpātmanāṃ kṛtadhiyāṃ hṛdayeṣu buddhiḥ|
śraddhā satāṃ kulajanaprabhavasya lajjā tāṃ tvāṃ natāḥ sma paripālaya devi viśvam||

TEXT POSITION 5

किं वर्णयाम तव रूपमचिन्त्यमेतत्किं चातिवीर्यमसुरक्षयकारि भूरि।
किं चाहवेषु चरितानि तवाति यानि सर्वेषु देव्यसुरदेवगणादिकेषु॥

kiṃ varṇayāma tava rūpamacintyametatkiṃ cātivīryamasurakṣayakāri bhūri|
kiṃ cāhaveṣu caritāni tavāti yāni sarveṣu devyasuradevagaṇādikeṣu||

Note: Retain short main तवाति यानि and its spacing rather than silently regularizing against the comparison.

TEXT POSITION 6

हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा।
सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या॥

hetuḥ samastajagatāṃ triguṇāpi doṣairna jñāyase hariharādibhirapyapārā|
sarvāśrayākhilamidaṃ jagadaṃśabhūtamavyākṛtā hi paramā prakṛtistvamādyā||

TEXT POSITION 7

यस्याः समस्तसुरतासमुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि।
स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च॥

yasyāḥ samastasuratāsamudīraṇena tṛptiṃ prayāti sakaleṣu makheṣu devi|
svāhāsi vai pitṛgaṇasya ca tṛptiheturuccāryase tvamata eva janaiḥ svadhā ca||

Note: Retain main समस्तसुरता; explain the surrounding gods/ritual terms conservatively, without prescribing a fire ritual.

TEXT POSITION 8

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासि सा भगवती परमा हि देवि॥

yā muktiheturavicintyamahāvratā tvamabhyasyase suniyatendriyatattvasāraiḥ|
mokṣārthibhirmunibhirastasamastadoṣairvidyāsi sā bhagavatī paramā hi devi||

TEXT POSITION 9

शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नाम्।
देवि त्रयी भगवती भवभावनाय वार्ता च सर्वजगतां परमार्तिहन्त्री॥

śabdātmikā suvimalargyajuṣāṃ nidhānamudgītharamyapadapāṭhavatāṃ ca sāmnām|
devi trayī bhagavatī bhavabhāvanāya vārtā ca sarvajagatāṃ paramārtihantrī||

Note: Retain main उद्गीथ; the primary footnote records उद्गीत. Udgitha is retained in all original meanings.

TEXT POSITION 10

मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसङ्गा।
श्रीः कैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा॥

medhāsi devi viditākhilaśāstrasārā durgāsi durgabhavasāgaranaurasaṅgā|
śrīḥ kaiṭabhārihṛdayaikakṛtādhivāsā gaurī tvameva śaśimaulikṛtapratiṣṭhā||

TEXT POSITION 11

ईषत्सहाससममलं परिपूर्णचन्द्रबिम्बानुकारि कनकोत्तमकान्तिकान्तम्।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण॥

īṣatsahāsamamalaṃ paripūrṇacandrabimbānukāri kanakottamakāntikāntam|
atyadbhutaṃ prahṛtamāttaruṣā tathāpi vaktraṃ vilokya sahasā mahiṣāsureṇa||

TEXT POSITION 12

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः।
प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितान्तकदर्शनेन॥

dṛṣṭvā tu devi kupitaṃ bhrukuṭīkarālamudyacchaśāṅkasadṛśacchavi yanna sadyaḥ|
prāṇānmumoca mahiṣastadatīva citraṃ kairjīvyate hi kupitāntakadarśanena||

TEXT POSITION 13

देवि प्रसीद परमा भवती भवाय सद्यो विनाशयसि कोपवती कुलानि।
विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य॥

devi prasīda paramā bhavatī bhavāya sadyo vināśayasi kopavatī kulāni|
vijñātametadadhunaiva yadastametannītaṃ balaṃ suvipulaṃ mahiṣāsurasya||

TEXT POSITION 14

ते संमता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति धर्मवर्गः।
धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना॥

te saṃmatā janapadeṣu dhanāni teṣāṃ teṣāṃ yaśāṃsi na ca sīdati dharmavargaḥ|
dhanyāsta eva nibhṛtātmajabhṛtyadārā yeṣāṃ sadābhyudayadā bhavatī prasannā||

TEXT POSITION 15

धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति।
स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि तेन॥

dharmyāṇi devi sakalāni sadaiva karmāṇyatyādṛtaḥ pratidinaṃ sukṛtī karoti|
svargaṃ prayāti ca tato bhavatīprasādāllokatraye'pi phaladā nanu devi tena||

TEXT POSITION 16

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता॥

durge smṛtā harasi bhītimaśeṣajantoḥ svasthaiḥ smṛtā matimatīva śubhāṃ dadāsi|
dāridryaduḥkhabhayahāriṇi kā tvadanyā sarvopakārakaraṇāya sadārdracittā||

TEXT POSITION 17

एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वन्तु नाम नरकाय चिराय पापम्।
संग्राममृत्युमधिगम्य दिवं प्रयान्तु मत्वेति नूनमहितान्विनिहंसि देवि॥

ebhirhatairjagadupaiti sukhaṃ tathaite kurvantu nāma narakāya cirāya pāpam|
saṃgrāmamṛtyumadhigamya divaṃ prayāntu matveti nūnamahitānvinihaṃsi devi||

TEXT POSITION 18

दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम्।
लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वहितेषु साध्वी॥

dṛṣṭvaiva kiṃ na bhavatī prakaroti bhasma sarvāsurānariṣu yatprahiṇoṣi śastram|
lokānprayāntu ripavo'pi hi śastrapūtā itthaṃ matirbhavati teṣvahiteṣu sādhvī||

TEXT POSITION 19

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम्।
यन्नागता विलयमंशुमदिन्दुखण्डयोग्याननं तव विलोकयतां तदेतत्॥

khaḍgaprabhānikaravisphuraṇaistathograiḥ śūlāgrakāntinivahena dṛśo'surāṇām|
yannāgatā vilayamaṃśumadindukhaṇḍayogyānanaṃ tava vilokayatāṃ tadetat||

TEXT POSITION 20

दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिन्त्यमतुल्यमन्यैः।
वीर्यं च हन्तृहतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थम्॥

durvṛttavṛttaśamanaṃ tava devi śīlaṃ rūpaṃ tathaitadavicintyamatulyamanyaiḥ|
vīryaṃ ca hantṛhatadevaparākramāṇāṃ vairiṣvapi prakaṭitaiva dayā tvayettham||

Note: Enlarged image confirms हन्तृहतदेव, matching the comparison's spaced हन्तृ हतदेव at 21. Correct first-pass हन्तृहृतदेव as a transcription error. Keep the source footnote variant separate.

TEXT POSITION 21

केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहारि कुत्र।
चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेऽपि॥

kenopamā bhavatu te'sya parākramasya rūpaṃ ca śatrubhayakāryatihāri kutra|
citte kṛpā samaraniṣṭhuratā ca dṛṣṭā tvayyeva devi varade bhuvanatraye'pi||

TEXT POSITION 22

त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्धनि तेऽपि हत्वा।
नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते॥

trailokyametadakhilaṃ ripunāśanena trātaṃ tvayā samaramūrdhani te'pi hatvā|
nītā divaṃ ripugaṇā bhayamapyapāstamasmākamunmadasurāribhavaṃ namaste||

TEXT POSITION 23

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च॥

śūlena pāhi no devi pāhi khaḍgena cāmbike|
ghaṇṭāsvanena naḥ pāhi cāpajyāniḥsvanena ca||

TEXT POSITION 24

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि॥

prācyāṃ rakṣa pratīcyāṃ ca caṇḍike rakṣa dakṣiṇe|
bhrāmaṇenātmaśūlasya uttarasyāṃ tatheśvari||

TEXT POSITION 25

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते।
यानि चात्यर्थघोराणि तैरक्षास्मांस्तथा भुवं॥

saumyāni yāni rūpāṇi trailokye vicaranti te|
yāni cātyarthaghorāṇi tairakṣāsmāṃstathā bhuvaṃ||

Note: Fresh primary inspection confirms भुवं, correcting provisional भुवम्. Preserve main चात्यर्थघोर rather than footnote चात्यन्तघोर. Word spacing is editorial; no lexical substitution.

TEXT POSITION 26

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके।
करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्वतः॥

khaḍgaśūlagadādīni yāni cāstrāṇi te'mbike|
karapallavasaṅgīni tairasmānrakṣa sarvataḥ||

TEXT POSITION 27

ऋषिरुवाच।
एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः।
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः॥

ṛṣiruvāca|
evaṃ stutā surairdivyaiḥ kusumairnandanodbhavaiḥ|
arcitā jagatāṃ dhātrī tathā gandhānulepanaiḥ||

TEXT POSITION 28

भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैः सुधूपिता।
प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान्॥

bhaktyā samastaistridaśairdivyairdhūpaiḥ sudhūpitā|
prāha prasādasumukhī samastānpraṇatānsurān||

TEXT POSITION 29

देव्युवाच।
व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम्।
(ददाम्यहमतिप्रीत्या स्तवैरेभिः सुपूजिता)।
देवा ऊचुः।
भगवत्या कृतं सर्वं न किंचिदवशिष्यते॥

devyuvāca|
vriyatāṃ tridaśāḥ sarve yadasmatto'bhivāñchitam|
(dadāmyahamatiprītyā stavairebhiḥ supūjitā)|
devā ūcuḥ|
bhagavatyā kṛtaṃ sarvaṃ na kiṃcidavaśiṣyate||

Note: The parenthesized ददाम्यहमतिप्रीत्या line is printed in large main type and is retained as a parenthesized reading, unlike the smaller commentary-only कर्तव्यमपरं line. This printed position includes speaker changes and multiple half-lines; do not describe every numbered position as a full verse.

TEXT POSITION 30

यदयं निहतः शत्रुरस्माकं महिषासुरः।
यदि वापि वरो देयस्त्वयास्माकं महेश्वरि॥

yadayaṃ nihataḥ śatrurasmākaṃ mahiṣāsuraḥ|
yadi vāpi varo deyastvayāsmākaṃ maheśvari||

Note: Preserve main यदि वापि rather than footnote यदि चापि.

TEXT POSITION 31

संस्मृता संस्मृता त्वं नो हिंसेयाः परमापदः।
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने॥

saṃsmṛtā saṃsmṛtā tvaṃ no hiṃseyāḥ paramāpadaḥ|
yaśca martyaḥ stavairebhistvāṃ stoṣyatyamalānane||

Note: Preserve main हिंसेयाः rather than commentary हिंसेथाः. The protection request is not a promised outcome.

TEXT POSITION 32

तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदाम्।
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेयाः सर्वदाम्बिके॥

tasya vittarddhivibhavairdhanadārādisaṃpadām|
vṛddhaye'smatprasannā tvaṃ bhaveyāḥ sarvadāmbike||

Note: Enlarged image confirms main अस्मत्प्रसन्ना, matching comparison position 37. The primary footnote records अस्मत्प्रसत्ता; do not import it. The meaning is a request for favour, not a wealth guarantee.

TEXT POSITION 33

ऋषिरुवाच।
इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः।
तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप॥

ṛṣiruvāca|
iti prasāditā devairjagato'rthe tathātmanaḥ|
tathetyuktvā bhadrakālī babhūvāntarhitā nṛpa||

TEXT POSITION 34

इत्येतत्कथितं भूप संभूता सा यथा पुरा।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी॥

ityetatkathitaṃ bhūpa saṃbhūtā sā yathā purā|
devī devaśarīrebhyo jagattrayahitaiṣiṇī||

TEXT POSITION 35

पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत्।
वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः॥

punaśca gaurīdehātsā samudbhūtā yathābhavat|
vadhāya duṣṭadaityānāṃ tathā śumbhaniśumbhayoḥ||

Note: Preserve main गौरीदेहात्सा rather than footnote गौरीदेहासा.

TEXT POSITION 36

रक्षणाय च लोकानां देवानामुपकारिणी।
तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते॥

rakṣaṇāya ca lokānāṃ devānāmupakāriṇī|
tacchṛṇuṣva mayākhyātaṃ yathāvatkathayāmi te||

समापन — पुष्पिका

COLOPHON

इति श्रीमार्कण्डेयपुराणे शक्रादिकृतदेव्याः स्तुतिर्नाम चतुर्थोऽध्यायः॥४॥

iti śrīmārkaṇḍeyapurāṇe śakrādikṛtadevyāḥ stutirnāma caturtho'dhyāyaḥ||4||